तामतिक्रम्य मधुना राजन् कुम्भीनसी हृता” ।)

कुम्भीपाकः, पुं, (कुम्भ्यां उखायां पाक इव पाको यत्र ।) नरकविशेषः । इति जटाधरः । तत्पर्य्यायः । सम्प्रतापनः २ । इति मनुः । “य इह पशून् पक्षिणो वा प्राणतो रन्धयति तं परत्र यमदूतास्तप्ततैले रन्धयन्ति यत्र । इति श्रीभागवते । ६ । २६ । ७ ॥

कुम्भीरः, पुं, (कुम्भिनं हस्तिनमपि ईरयति । ईर + “कर्म्मण्यण्” । ३ । २ । १ ।) जलजन्तुविशेषः । कुमीर इति भाषा । तत्पर्य्यायः । नक्रः २ । इत्यमरः । १ । १० । २१ ॥ कुम्भीलः ३ । इति तट्टीका । गिलग्राहः ४ महाबलः ५ । इति राजनिर्घण्टः । वार्म्मटः ६ अम्बुकिरातः ७ अम्बुकण्टकः ८ । इति शब्दरत्नावली ॥

(यथा, महाभारते । १३ । १११ । ५८ ।

“गर्दभत्वन्तु संप्राप्य दशवर्षाणि जीवति ।
संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः” ॥)

कुम्भीरमक्षिका, स्त्री, (कुम्भीर इत्याख्या मक्षिका । यद्वा कुम्भीरोपमदयुक्ता मक्षिका ।) मक्षिकाविशेषः । कुमीरा पोका इति भाषा । तत्पर्य्यायः । कला २ । इति हारावली ॥

कुम्भीलः, पुं, (कुम्भीर + रस्य लः ।) कुम्भीरः । इत्यमरटीका ॥

कुम्भीवीजं, क्ली, (कुम्भ्या वीजम् ।) जयपालः । इति राजनिर्घण्टः । (जयपालशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

कुर श शब्दे । इति कविकल्पद्रुमः । (तुदां-परं-अकं-सेट् ।) श कुरति कोकिला । इति दुर्गादासः ॥

कुरकः, स्त्री, (कुर् + कः । कुरः शब्दः कायति प्रकाशतेऽस्मिन् । कै + कः ।) सल्लकीवृक्षः । इति राजनिर्घण्टः ॥

कुरङ्करः, पुं, (कुरमित्यव्यक्तशब्दं करोति । कुरम् + कृ + टः ।) सारसपक्षी । इति हेमचन्द्रः ॥

कुरङ्कुरः, पुं, (कुरं इत्यस्फुटशब्दं कुरति । कुर् + कः ।) सारसपक्षी । इति हारावली ॥

कुरङ्गः पुं, (कौ पृथिव्यां भूमौ वा रङ्गति । रगि + अच् । यद्वा, “विडादिभ्यः कित्” । उणां १ । १२० इति अङ्गच् बाहुलकात् उत्वं रपरत्वञ्च । कुरङ्ग-विहङ्गादयः सर्व्वे निपात्यन्ते । इति वा ।) हरिणः । इत्यमरः । २ । ५ । ८ ॥ कुतङ्गकोऽपि ॥

(यथा, भागवतटीकायां स्वामिना प्रोक्तम् ।

“कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च” ॥)

अस्य गुणाः यथा,—

“कुरङ्गो वंहणो बल्यः शीतलः पित्तहृद्गुरुः ।
मधुरो वातहृद्ग्राही किञ्चित्कफकरः स्मृतः” ।

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ * ॥

अस्य लक्षणं यथा,—

“न कृष्णो न च ताम्रश्च कुरङ्गः सोऽभिधीयते” ।

इति सूत्रस्थाने षट्चत्वारिंशेऽध्याये सुश्रुतेनोक्तम् ।)

कुरङ्गनयना, स्त्री, (कुरङ्गस्य नयने इव नयने यस्याः ।) मृगनयना नारी । इति राजनिर्घण्टः ॥ (उक्तञ्च, “किन्त्वेकाग्रमुना कुरङ्गनयना नेत्राम्बुभिर्वर्द्धते” ।)

कुरङ्गनाभिः, पुं, (कुरङ्गस्य नाभिः ।) कस्तूरी । इति राजनिर्घण्टः ॥ (कस्तूरीशब्दे ऽस्य गुणादयो बोद्धव्याः ।)

कुरङ्गमः, पुं, (कौ भूमौ रङ्गं मिमीते । मा + डः ।) हरिणविशेषः । तत्पर्य्यायः । रुरुः २ न्यङ्कुः ३ रिश्यः ४ चारुलोचनः ५ । इति त्रिकाण्डशेषः ।

कुरङ्गिका, स्त्री, (कौ रङ्गोऽस्या अस्तीति । ठन् टाप् च ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥

कुरचिल्लः, पुं, (कुरे शब्दे चिल्लति । चिल्ल शैथिल्ये + अच् ।) कर्कटः । इति हेमचन्द्रः ॥

कुरटः, पुं, (कुर् + अटन् किच्च । कु कुत्सितरूपया रटति जीवति देहयात्रां सम्पादयति वा । रट + अच् ।) चर्म्मकारः । इति त्रिकाण्डशेषः ॥

कुरण्टकः, पुं, (कुर्य्यते शब्द्यते इति । कुर् + कर्म्मणि बाहुलकात् अण्टक् स्वार्थे कन् ।) पीतम्लानः । पीतझिण्टी । इति राजनिर्घण्टः ॥ (अस्य पर्य्याय-लक्षणगुणा यथा,—

“सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते ॥
कुरण्टकोऽत्र पीते स्याद्रक्ते कुरवकः स्मृतः ।
नीले बाणादयोरक्तो दासे आर्त्तगलश्च सः ॥
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।
तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः” ।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

“किंशुकं कर्णमित्तञ्च तद्देव कुरण्टकम्” ।

इति सुश्रुते सूत्रस्थाने ४६ अः । अत्रास्य नपुंसकत्वं लक्ष्यते ।)

कुरण्डः, पुं, (कुर + अण्डक् ।) मुष्कवृद्धिरोगः । कोरण्ड इति भाषा । तत्पर्य्यायः । वृद्धिः २ अण्डवर्द्धनः ३ । इति हेमचन्द्रः ॥ तस्य सम्प्राप्तिपूर्व्वकं लक्षणं यथा,—

“क्रुद्धोऽधूर्द्धगतिर्वायुः शोथशूलकरश्चरन् ।
मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ॥
प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ।
दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा मतः ॥
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ।
वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक् ।
पक्वोडुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान् ।
कफाच्छीतो गुरुः स्निग्धः कण्डूमान्कठिनोऽल्परुक् ।
कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः ।
कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः ॥
मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः ।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः ॥
मूत्रकृच्छ्रमधः स्याच्च चालयन् फलकोषयोः ।
वातकोपिभिराहारैः शीततोयावगाहनैः ॥
धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः ।
क्षोभणैः क्षुभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा ।
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् ।
कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ।
उपेक्ष्यमाणस्य च मुष्कवृद्धि-
माध्मानरुक्स्तम्भवतीं स वायुः ।
प्रपीडितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥
अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः” ॥

इति वृद्धिनिदानम् ॥ इति माधवकरः ॥ * ॥

तस्यौषधं यथा,—

“द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा ।
गद्यक्षमात्रं प्रलेपात् कुरण्डगलगण्डकम् ॥
रसाञ्जनं हरीतक्याश्चूर्णं तेनैव गुण्ठनात् ।
नश्येद्वै पुत्रवच्चापि नात्र कार्य्या विचारणा” ।

इति गारुडे १९० अध्यायः ॥ * ॥ अन्यच्च ।

“गव्यं घृतं सैन्धवसंप्रयुक्तं
शम्बूकभाण्डे निहितं तदेव ।
सप्ताहमादित्यकरैर्विपक्वं
हन्यात् कुरण्डं चिरजं प्रवृद्धम्” ।

गव्यघृत कर्ष १ । सैन्धव मा ४ । शम्बूकभाण्डे कृत्वा सप्तदिनं यावत् रौद्रे भावयेत् तेन कुरण्डनाशनम् ॥

“सैन्धवञ्च घृताभ्यक्तं ताम्रभाजन आतपे ।
प्रतप्तमूर्व्वया घृष्टं तन्मलञ्च समाहरेत् ।
कुरण्डं मर्द्दयेत्तेन स निर्व्विघ्नं दिवानिशम् ।
कुरण्डं तेन संक्षिप्तं नाशमायाति पुनर्व्वसुः ॥

ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमलुञ्चिकया घृष्ट्वा मलग्रहं कृत्वा तेन मर्द्दयेत् ॥

“वल्कवारस्य वीजञ्च पिष्ट्वा तच्चार्द्रकैः सह ।
कुरण्डं नाशयेद्धुमे लेपनान्नात्र संशयः ॥
घृतैर्नीलोत्पलं मूलं पिष्ट्वा लिम्पेत् कुरण्डकम् ।
अथवा लेपनं कुर्य्यात् स्थलमण्डूकशोणितैः” ॥

इति भैषज्यरत्नावली ॥ * ॥ अपरञ्च ।

“गुग्गुलुं रुवुतैलं वा गोमूत्रेण पिवेन्नरः ।
वातवृद्धिं निहन्त्याशु चिरकालानुवन्धिनीम् ॥
सक्षीरं वा पिवेत्तैलं मासमेरण्डसम्भवम् ।
पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ॥
पाने वस्तौ रुवोस्तैलं पेयं वा दशकाम्भसा ।
चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलम् ॥
क्षीरपिष्टैः प्रदेहः स्याद्दाहशोथरुजापहः ।
पञ्चवल्कलकल्केन सघृतेन प्रलेपनम् ॥
सर्व्वं पित्तहरं कार्य्यं रक्तजे रक्तमोक्षणम् ।
श्लेष्मवृद्धिं तूष्णवीर्य्यैर्मूत्रपिष्टैः प्रलेपयेत् ॥
पीतदारुकषायञ्च पिवेन्मूत्रेण संयुतम् ।
स्विन्नं मेदःसमुत्थान्तु लेपयेत् सुरसादिना ॥
शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ।
संस्वेद्य मूत्रप्रभवं वस्त्रपट्टेन वेष्टयेत् ॥
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन वै ।
मुष्कोपरि च कर्णान्ते त्यक्त्वा सेवनिमादरात् ॥
शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् ।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये ।
अङ्गुष्ठमध्ये त्वक् छित्त्वा दहेदङ्गविपर्य्यये ॥
रास्नायष्ट्यमृतैरण्डबलागोक्षुरसाधितः ।
क्वाथोऽन्त्रवृद्धिं हन्त्याशु रुवुतैलेन मिश्रितः ॥
तैलमेरण्डजं पीत्वा बलासिद्धपयोऽन्वितम् ।
आध्मानशूलोपचितामन्त्रवृद्धिं जयेन्नरः ॥